# Sri Rama Namavali from Ramaotsava Kalpalata

# શ્રીરામોત્સવકલ્પલતોદ્ધૃતા શ્રીરામનામાવલિઃ

## Document Information


Text title : rAmanAmAvalI from rAmotsavakalpalatA

File name : rAmanAmAvalIrAmotsavakalpalatA.itx

Category : raama, aShTottarashatanAmAvalI, nAmAvalI

Location : doc_raama

Transliterated by : lalitha parameswari parameswari.lalitha at gmail.com

Proofread by : lalitha parameswari parameswari.lalitha at gmail.com

Latest update : October 5, 2018

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 21, 2023

*sanskritdocuments.org*

# શ્રીરામોત્સવકલ્પલતોધ્દૃતા શ્રીરામનામાવલિઃ

ॐ શ્રીસીતારામચન્દ્રપરબ્રહ્મણે નમઃ ।

શ્રીરામ નવરાત્રોત્સવ કલ્પઃ

નામાવલીસ્ત બકઃ ।

શ્રીરામોત્સવકલ્પલતોધ્દૃતા શ્રીરામનામાવલી

ॐ શ્રીમદ્ગૌરીશ વાગીશ શચીશાદિ સુરાર્ચિતાય નમઃ ।

ॐ પક્ષીન્દ્રગમનોદ્ધૃત્ત પાઞ્ચજન્યરવાઞ્ચિતાય નમઃ ।

ॐ પાકારિમુખદેવૌઘ કેકિલોક ઘનાઘનાય નમઃ ।

ॐ પરમેષ્ઠિ મુખામ્ભોજ પદ્મિનીવલ્લભાકૃતયે નમઃ ।

ॐ શર્વહૃત્કૈરવોલ્લાસ ચન્દ્રિકાયિત સુસ્મિતાય નમઃ ।

ॐ ચક્રાદ્યાયુધસંયુક્ત ચતુર્ભુજ સમન્વિતાય નમઃ ।

ॐ ગર્ભીકૃત ભયામર્ત્ય નિર્ભીકરણ પણ્ડિતાય નમઃ ।

ॐ દાનવારણ્ય સંશોષદાવીકૃત નિજાયુધાય નમઃ ।

ॐ ધરણીભારકૃદ્દૈત્યદારણોદ્યત નિશ્ચયાય નમઃ ।

ॐ સમાનીકૃતવૈકુણ્ઠસાકેતપુર લોલુપાય નમઃ ।

ॐ પ્રાજાપત્યેષ્ટિસમ્ભૂતપાયસાન્ન રસાનુગાય નમઃ ।

ॐ કોસલેન્દ્રાત્મજાગર્ભકરોદ્ભૂત હરિન્મણયે નમઃ ।

ॐ નિર્વિશેષગુણોપેતનિજાનુજ સમન્વિતાય નમઃ ।

ॐ પઙ્ક્તિસ્યન્દનસન્તોષપારાવાર સુધાકરાય નમઃ ।

ॐ ધર્મશાસ્ત્રત્રયીતત્ત્વધનુર્વેદ વિચક્ષણાય નમઃ ।

ॐ યજ્ઞાન્તરાયસઞ્જાતાયાસ કૌશિકયાચિતાય નમઃ ।

ॐ ગુરુબોધિતપિત્રાજ્ઞાગુર્વીકરણ પૌરુષાય નમઃ ।

ઊ ગાધેયબોધિતોદારગાધાદ્વયજિતશ્રમાય નમઃ ।

ॐ તાટકોરસ્થલક્રૌઞ્ચધરાભૃદ્દારણાગ્નિ ભુવે નમઃ ।

ॐ સૃષ્ટાનલાસ્ત્ર સન્દગ્ધદુષ્ટમારીચસોદરાય નમઃ ।

ॐ સમીરાસ્ત્રાબ્ધિસઙ્ક્ષિપ્તતાટકાગ્રતનૂભવાય નમઃ ।

ૐ સત્રભાગસમાયાતસુત્રામાદિ સુભિક્ષકૃતે નમઃ ।
ૐ રૂઢક્રતુજમુન્મૌનિગાઢાલિઙ્ગિતવિગ્રહાય નમઃ ।
ૐ અહલ્યાશાપપાપાબ્દિહારણોદ્યતપદ્રજસે નમઃ ।
ૐ શર્વબાણાસનાદ્રીન્દ્ર ગર્વભઞ્જન જમ્ભ ઘ્ને નમઃ ।
ૐ સાક્ષાદ્રમાવનીજાતાસાક્ષતોદકરગ્રહિણે નમઃ ।
ૐ દુર્વારભાર્ગવાખર્વગર્વદર્વીકરાહિભુજે નમઃ ।
ૐ સ્વસ્વપત્નીસમાયુક્ત સાનુજોદિતભાગ્યવતે નમઃ ।
ૐ નિજદારસમાવેશનિત્યોત્સવિતપૂર્જનાય નમઃ ।
ૐ મન્થરાદિષ્ટ કૈકેયીમત્યન્તરિતરાજ્યધુરે નમઃ ।
ૐ નિષાદવરપુણ્યૌઘનિલિમ્પદ્રુફલોદયાય નમઃ ।
ૐ ગઙ્ગાવતરણોત્સૃષ્ટશૃઙ્ગિબેરપુરાધિપાય નમઃ ।
ૐ ભક્ત્યુત્કટપરિક્લુપ્ત ભરદ્વાજપદાનતયે નમઃ ।
ૐ ચિત્રકૂટાચલપ્રાન્તચિત્રકાનનભૂસ્થિતાય નમઃ ।
ૐ પાદુકાન્યસ્ત સામ્રાજ્યભરવત્કૈકયીસુતાય નમઃ ।
ૐ જાતકાર્યાગતાનેક જનસમ્મર્દનાસહાય નમઃ ।
ૐ નાકાધિપતનૂજાતકાકદાનવદર્પહૃતે નમઃ ।
ૐ કોદણ્ડગુણનિર્ઘોષઘૂર્ણિતાયિતદણ્ડકાય નમઃ ।
ૐ વાલ્મીકિમુનિસન્દિષ્ટવાસસ્થલનિરૂપણાય નમઃ ।
ૐ વિરાધશાલ્મલીવૃક્ષવિધ્વંસાનિલસંહતયે નમઃ ।
ૐ નિરાકૃતસુરાધીશનીરેશ શર ભ ઙ્ગકાય નમઃ ।
ૐ અનસૂયાઙ્ગરાગાઞ્ચદવનીતનયાન્વિતાય નમઃ ।
ૐ સુતીક્ષ્ણમુનિ સં સેવાસૂચિતાત્માતિથિક્રિયાય નમઃ ।
ૐ કુમ્ભજાત દયાદત્ત જમ્ભારાતિશરાસનાય નમઃ ।
ૐ દણ્ડકાવનસંલીનચણ્ડાસુરવધોદ્યતાય નમઃ ।
ૐ પ્રાઞ્ચત્પઞ્ચવટીતીર પર્ણાગારપરાયણાય નમઃ ।
ૐ ગોદાવરીનદીતોયગાહનાઞ્ચિતવિગ્રહાય નમઃ ।
ૐ હાસાપાદિતરક્ષસ્ત્રી નાસાશ્રવણ કર્ત નાય નમઃ ।
ૐ ખર સૈન્યાટવીપાતસરયાભીલમારુતાય નમઃ ।
ૐ દૂષણ ત્રિશિરઃશૈલતુણ્ડનોગ્રશરાસનાય નમઃ ।
ૐ વિરૂપિતાનુજાકાર વિક્ષોભિતદશાનનાય નમઃ ।
ૐ હાટકાકારસઞ્છન્નતાટકેયમૃગદ્વિપિને નમઃ ।
ૐ સીતાપરાધદુર્મે ધિભૂતાનુજવિનિન્દકાય નમઃ ।

ૐ પં ક્ત્યાસ્યાહતષક્ષીન્દ્ર પરલોકસુખપ્રદાય નમઃ ।
ૐ સીતાપહરણોધ્ભૂતચિન્તાક્રાન્તનિજાન્તરાય નમઃ ।
ૐ કાન્તાન્વેષણમાર્ગસ્થકબન્ધાસુરહિંસકાય નમઃ ।
ૐ શબરીદત્ત પક્વામ્ર ઙાતાસ્વાદકુતૂહલાય નમઃ ।
ૐ પમ્પાસરોવરોપાન્ત પ્રાપ્ત મારુતિસંસ્તુતયેનમઃ ।
ૐ શ સ્ત પ્રસ્તાવસામીરિશિબ્દસૌષ્ઠવતોષિતાય નમઃ ।
ૐ સિન્ધુરોન્નતકાપેયસ્કન્ધારોહણબન્ધુરાય નમઃ ।
ૐ સાક્ષીકૃતાનલાદિત્ય કૌક્ષેયકપિસખ્યભાજે નમઃ ।
ૐ પૂષજાનીત વૈદેહિભૂષાલોકનવિગ્રહાય નમઃ ।
ૐ સપ્તતાલનિપાતાત્ત સચિવામોદકોવિદાય નમઃ ।
ૐ દુષ્ટદૌન્દુભ કઙ્કાલતોલનાગ્રપદઙ્ગુલયે નમઃ ।
ૐ વાલિપ્રાણાનિલાહારવાતાશનનિભામ્બકાય નમઃ ।
ૐ કાન્તરાજ્યરમારૂઢકપિરાજનિ ષેવિતાય નમઃ ।
ૐ રુમાસુગ્રીવવલ્લી દ્રુસુમાકરદિનાયિતાય નમઃ ।
ૐ પ્રવર્ષણગુહાવાસ પરિયાપિતવાર્ષિકાય નમઃ ।
ૐ પ્રેષિતાનુજરુદ્ભીત પૌષાનન્દકૃદીક્ષણાય નમઃ ।
ૐ સીતામાર્ગણસન્દિષ્ટવાતાપત્યાર્પિતોર્મિ કાય નમઃ ।
ૐ સત્યપ્રાયોપવેશસ્થ સર્વવાનરસંસ્મૃતાય નમઃ ।
ૐ રાક્ષસીતર્જનાધૂતરમણીહૃદયસ્થિતાય નમઃ ।
ૐ દહનાપ્લુતસામીરિદાહસ્તમ્ભનમાન્ત્રિકાય નમઃ ।
ૐ સીતાદર્શનદૃષ્ટાન્તશિરોરત્ન નિરીક્ષકાય નમઃ ।
ૐ વનિતાજીવવદ્વાર્તાજનિતાનન્દકન્દલાય નમઃ ।
ૐ સર્વવાનર સઙ્કીર્ણસૈન્યાલોકનતત્પરાય નમઃ ।
ૐ સામુદ્રતીરરામેશસ્થાપનાત્તયશોદયાય નમઃ ।
ૐ રોષભીષ નદીનાથપોષણોચિતભાષણાય નમઃ ।
ૐ પદ્યાનોચિતપાથોધિપન્થાજઙ્ઘાલસૈન્યવતે નમઃ ।
ૐ સુવેલાદ્રિતલોદ્વેલવલીમુખબલાન્વિતાય નમઃ ।
ૐ પૂર્વદેવજનાધીશપુરદ્વારનિરોધકૃતે નમઃ ।
ૐ સરમાવરદુર્દૈન્યચરમક્ષણવીક્ષણાય નમઃ ।
ૐ મકરાસ્ત્રમહાસ્ત્રાગ્નિમાર્જનાસારસાયકાય નમઃ ।
ૐ કુમ્ભકર્ણમદેભોરઃ કુમ્ભનિર્ભેદ કેસરિણે નમઃ ।
ૐ દેવાન્તકનરાદાગ્રદીપ્યત્સંયમનીપથાય નમઃ ।

ॐ નરાન્તકસુરામિત્રશિરોધિનલહૃત્કરિણે નમઃ ।
ॐ અતિકાય મહાકાયવધોપાયવિધાયકાય નમઃ ।
ॐ દૈત્યાયોધનગોષ્ઠીકભૃત્યાન્દકરાહ્વયાય નમઃ ।
ॐ મેઘનાદતમોદ્ભેદમિહિરીકૃતલક્ષ્મણાય નમઃ ।
ॐ સઞ્જીવનીરસાસ્વાદનજીવાનુજ સેવિતાય નમઃ ।
ॐ લઙ્કાધીશશિરોગ્રાવટઙ્કાયિતશરાવલયે નમઃ ।
ॐ રાક્ષસીહારલતિકા લવિત્રીકૃતકાર્મુકાય નમઃ ।
ॐ સુનાશીરારિનાસીરઘનોન્મૂલકરાશુગાય નમઃ ।
ॐ દત્તદાનવરાજ્ય શ્રી ધારણાચ્ચદ્વિભીષણાય નમઃ ।
ॐ અનલોત્થિત વૈદેહીઘનશીલાનુમોદિતાય નમઃ ।
ॐ સુધાસારવિનિષ્યન્ધયથાપૂર્વવનેચરાય નમઃ ।
ॐ જાયાનુજાદિસર્વાપ્તજનાધિષ્ઠિત પુષ્પકાય નમઃ ।
ॐ ભારદ્વાજકૃતાતિથ્યપરિતુષ્ટાન્તરાત્મ કાય નમઃ ।
ॐ ભરતપ્રત્યયા ષેક્ષાપરિપ્રેષીતમારુતયે નમઃ ।
ॐ ચતુર્ધશસમાન્તાત્તશત્રુઘ્નભરતાનુગાય નમઃ ।
ॐ વન્દનાનન્દિતાનેકનન્દિગ્રામસ્થમાતૃકાય નમઃ ।
ॐ વર્જિતાત્મીયદેહસ્થવાનપ્રસ્થજનાકૃતયે નમઃ ।
ॐ નિજાગમનજાનન્દસ્વજાનપદવીક્ષિતાય નમઃ ।
ॐ સાકેતાલોકજામોદસાન્દ્રીકૃતહૃદસ્તારાય નમઃ ।
ॐ ભરતાર્પિતભૂભારભરણાઙ્ગીકૃતાત્મકાય નમઃ ।
ॐ મૂર્ધજામૃષ્ટવાસિસ્ઠમુનિપાદરજઃકણાય નમઃ ।
ॐ ચતુરર્ણવગઙ્ગાદિજલસિક્તાત્મ વિગ્રહાય નમઃ ।
ॐ વસુવાસવવાય્વગ્નિવાગીશાધમરાર્ચિતાય નમઃ ।
ॐ માણિક્યહાર કેયૂરમકુટાદિવિભૂષિતાય નમઃ ।
ॐ યાનાશ્વગજરત્નૌઘનાનોપપાયનભાજનાય નમઃ ।
ॐ મિત્રાનુજોદિતશ્વેતચ્છત્રાપાદિતરાજ્યધુરે નમઃ ।
ॐ શત્રુઘ્ન ભરતાધૂતચામરદ્વયશોભિતાય નમઃ ।
ॐ વાયવ્યાદિચતુષ્કોણવાનરેશાદિ સેવિતાય નમઃ ।
ॐ વામાઙ્કાઙ્કિતવૈદેહીશ્યામારત્નમનોહરાય નમઃ ।
ॐ પુરોગતમરુત્પુત્રપૂર્વપુણ્યફલાયિતાય નમઃ ।
ॐ સત્યધર્મદયાશૌચનિત્યસન્તર્પિતપ્રજાય નમઃ ।
ॐ યથાકૃતયુગાચારકથાનુગતમણ્ડલાય નમઃ ।

ૐ ચરિતસ્વકુલાચારચાતુર્વર્ણ્યદિનાશ્રિતાય નમઃ ।
ૐ અશ્વમેધાદિસત્રાન્નશશ્વત્સન્તર્પિતામરાય નમઃ ।
ૐ ગોભૂહિરણ્યવસ્ત્રાદિલાભામોદિતભૂસુરાય નમઃ ।
ૐ મામ્પાતુપાત્વિતિ જપન્મનોરાજીવષટ્પદાય નમઃ ।
ૐ જન્માપનયનોદ્યુક્ત હૃન્માનસસિતચ્છદાય નમઃ ।
ૐ મહાગુહાજચિન્વાનમણિદીપાયિતસ્મૃતયે નમઃ ।
ૐ મુમુક્ષુ જનદુર્દૈન્યમોચનોચિતકલ્પકાય નમઃ ।
ૐ સર્વભક્ત જનાઘૌઘસામુદ્રજલ બાડબાય નમઃ ।
ૐ નિજદાસજનાકાઙ્ક્ષિનિત્યાર્થ પ્રદકામદુઘે નમઃ ।
ૐ સાકેતપુરસંવાસિસર્વસજ્જનમોક્ષદાય નમઃ ।
ૐ શ્રીભૂનીલાસમાશ્લિષ્ટ શ્રી મદાનન્દવિગ્રહાય નમઃ ।

ઇતિ શ્રીરામોત્સવકલ્પલતોદ્ધૃતા શ્રીરામનામાવલિઃ સમાપ્તા ।

Encoded and proofread by lalitha parameswari parameswari.lalitha at gmail.com

---

*Sri Rama Namavali from Ramaotsava Kalpalata*

pdf was typeset on January 21, 2023

Please send corrections to *sanskrit@cheerful.com*